M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. /
Ser. 78

Title: Rishi Panchami Puja

Patel

98

Rishi-Panchami-Pujā	Title
	Author
	Editor
Sam. 1861	Year, Vols.
	Publisher
98	Remarks

१४

॥अथऋषिपंचमीपूजाप्रारंभः॥

श्रीगणेशाय नमः॥ अथ ऋषिपंचमी॥ एवंगुणविशेषणविशेष्टायां
पुण्यतिथौ मम ज्ञाताज्ञातरजःसंपर्कजनितसकलपापक्षयपुत्रपौ
त्राभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सारुंधतीकान् सप्तऋषीन् पुज
यिष्ये॥ तदंग आसनादिकलशारा० पृथ्वीत्वया० पृथ्वीतीमंत्र० ऊर्ध्व
केशी० अपसर्पंतु० सर्वेषामवरो० तीक्ष्णदंष्ट्र० कलशस्यमु० गोम
योपलिप्ते स्वस्तिकादिविचित्रिते देशे सप्तधान्योपरि सजलं सहिर
ण्यकं सापिधानं कलशं संस्थापयेद्वस्त्रयुग्मेन वेष्टयेत्॥ तस्मिन्कल

शे कौशान् सप्तऋषीन् संस्थाप्य पूजयेत्॥ कश्यपाय० कश्यपं आवा
हयामि १ अत्रेन० अत्रं आवा० २ भरद्वाजाय० भरद्वाजं आवा० ३ विश्वा
मित्राय० विश्वामित्रं आ० ४ गौतमाय० गौतमं आवा० ५ जमदग्ने० ज
मदग्निं आवा० ६ वशिष्टाय० वसिष्ठं आवा० ७ अरुंधत्यै नमः अरुंध
तीं आवा० ८ जटिलाः साक्षसूत्राश्च कमंडलुधरास्तथा॥ ध्यायतां
पापहरणाः प्रसन्ना भक्तवत्सलाः॥ अरुंधतीसहितसप्तऋषिदेवता
भ्यो नमः॥ ध्यानं॥ आवाहयाम्यत्र मुनीन् सर्वज्ञानविशारदान्॥ पूज्या

ऋषि०पं न्सर्वत्रलोकस्याव्रतसाकुण्यकारकान्॥ सारुंधतीकान्सप्तऋषीन्कु
२ शोथ्वावाहयामि॥ आवाहनं॥ सुवर्णजटितंदिव्यंनानारत्नोपशोभि
स तं॥ आनंकल्पितंयत्रगृह्यतांतमुनीश्वराः॥ आसनं॥ गंगाजलंसमा
नीतंसुगंधद्रव्यसंयुतं॥ पाद्यंतुप्रतिगृह्णंतुकश्यपाद्यामहर्षयः॥ अ
रुंधतीसहितसप्तऋषि० पाद्यं॥ सुवर्णपात्रेभद्रंचगंधपुष्पाक्षतैर्युतं॥
ऋषयःप्रतिगृह्णंतुअर्घ्यंदत्तंमयात्तुयत्॥ अरुंधतीसहितसप्तऋषि
दे० अर्घ्यं॥ कर्पूरवासितंतोयंसुवर्णकलशेस्थितं॥ ददाम्याचमनंभक्त्या रांम २

ऋषयःप्रतिगृह्यतां॥ अरुंधतीसहितसप्तऋषिदेवता० आचमनं॥
मधुपर्कोमयादत्तोनानावाससमन्वितः॥ ऋषीश्वराणांप्रीतयेदत्तोप्री
यतांभोमुनीश्वराः॥ अरुंधतीसहित० दधि॥ मधुपर्कः॥ पंचामृतंसुर
श्रेस्तुस० चंद्रमंडस० आज्यंसुरा० सर्वौषधिर० इक्षोरसिसमु०॥ पंचा
मृतं॥ शुद्धोदकस्नानं॥ महिम्नःपारंते०॥ सुगंधद्रव्यसंयुक्तंपवित्रंवि
मलंजलं॥ स्नानार्थंतुमयानीतंमुनयःप्रतिगृह्यतां॥ अरुंधतीसहि
तस्नानं॥ आचमनं॥ सूक्ष्माण्यतीवशुभ्राणीवासांसिविविधानिच॥

ऋ॰वि॰पं॰ ३ ऋषयःप्रतिगृह्णंतुसप्तप्रावरणानिच॥अरुंधती॰वस्त्रं॥आचमनं॥
नानामंत्रैःसमायुक्तेत्रिगुणंब्रह्मसूत्रकं॥प्रत्येकंचप्रयच्छामीऋषयः
प्रतिगृह्यतां॥उपवीतं॥हरिद्रारंजितादेव्यासौभाग्यासुखप्रदअत
स्त्वांप्रजयिष्यामीगृहाणपरमेश्वरी॥अरुंधत्यै॰हरिद्रां॰कुंकुमंकासि
कदिव्यंकामनाकामसंभवं॥कुंकुमेनार्चितादेवीगृहाणपरमेश्वरी॥अ
रुंधत्यै॰कुंकुमं॥कज्जलंचमयादत्तंनेत्रांजनसुशोभितं॥कर्पूरज्योति
रुत्पन्नंगृह्यतांपरमेश्वरी॥अरुंधत्यै॰कज्जलं॥सौभाग्यानिचद्रव्याणी राम ३

नानापरिमलानिच॥गृहाणार्थंमयादेवीप्रीत्यर्थंपरमेश्वरी॥अ
रुंधत्यै॰सौभाग्यद्रव्यं॥मलयोत्थंतापहरणंसुगंधद्रव्यसंयुतं॥चं
श्री दनंतस्त्रयच्छामिमुनीनांभावितात्मिनां॥गंधं॥सुगंधास्तंदुलाविप्राः
शंखशुभ्रामनोहराः॥अक्षतांश्चप्रयच्छामिगृह्णंतुमुनयःशुभाः॥
अरुंधतीसहितसप्तऋषिदेवता॰अक्षता॰शतपत्रंजातीमल्लिका
कुसुमंतथा॥पूजार्थंचप्रयच्छामिमुनीनांबिंदुकांतथा॥अरुंधतीस॰
पुष्पाणी॥कृष्णागरुगुग्गुलंचसुगंधंचंदनंतथा॥कश्यपादिमुनीनां

ऋ॰ष॰पं॰ चधूपोयंप्रतिगृह्यतां॥अरुंधतीस॰धूपं॥सुवर्णघृतसंयुक्तमंध
४ कारंविनश्यति॥दीपंचगृह्यतांविप्रामयदत्तंहिभक्तितः॥अरुंधती
सहितसप्तऋषिदेवता॰दीपं॥स्वाद्वन्नानिचसर्वाणीसस्रूपव्यंज
नानिच॥शर्कराघृतसंयुक्तंनैवेद्यंप्रतिगृह्यतां॥अरुंधतीसहित
सप्तदेवता॰नैवेद्यं॰उष्णोदकंशुद्धकरंशीतलंजलमुत्तमं॥गृह्णंतुमु
नयःसर्वेतदाचमनसंज्ञकं॥अरुंधतीस॰आचमनं॥मृगनाभिस
मायुक्तंकदलीसंभवान्वितं॥गृह्णंतुमुनयःसर्वेकरोद्वर्तनकंशुभं॥ रामं
४

अरुंधतीसहि॰करोद्वर्तनं॥पुंगीफलंमहादिव्यंनागवल्लीदलैर्युतं॥कर्पू
रेलासमायुक्तंतांबूलंप्रतिगृह्यतां॥तांबूलं॥नारिकेलंसकूष्मांडंमातु
लिंगफलानिच॥मयार्पितंमुनीशानांफलानिप्रतिगृह्यतां॥फलानि॥
दक्षिणा॥जन्मजन्मसुयत्पापंबुध्याबुध्यार्जितंमया॥तत्सर्वंनाशमा
यातुमुनियोरत्नपूजनात्॥अरुंधतीसहितसप्तऋष॰रत्नपूजा॥अ
र्घ्यं॥कश्यपःसर्वलोकाद्यसर्वलोकस्यवस्यते॥नृणांस्त्रिणांम्पपापानि
ऋषिरूपेनमोस्तुते॥कश्यपायन॰अर्घ्यं॰भरद्वाजाय॰अर्घ्यं॥विश्वा

ऋ०स०पं० मित्रनमस्तुभ्यंज्वालरूपमहाव्रतं॥अध्यक्षिकृतगायत्रीततोरूपणसं
५ स्थितः॥विश्वामित्राय०अर्घ्यं॥गौतमायनमस्तुभ्यंवेदवेदांगरूपिणे
ममपापव्यपोहंतुगृहंत्वर्घ्यंनमोस्तुते॥गौतमायनमः॥अर्घ्यं॥जमद
ग्निर्महातेजमहाव्रतपरायणः॥लोकेषुधर्मतीव्रस्थायापन्यभूनिव
र्त्तयः॥जमदग्नये०अर्घ्यं॥नमस्तुभ्यंवसिष्ठायजटिलायमहात्मने॥
रूपसत्वायलोकानांक लोकानांहितकारिणे॥वसिष्ठायनमः॥अर्घ्यं॥
नमस्तुभ्यंअरुंधत्येस[illegible]र्मपरायणः॥पतिव्रतेसुरश्रेष्ठेअर्घ्यंगृहं रामं
१

सध१

नमोस्तुते॥अरुंधत्यैनमः॥अर्घ्यं॥च॥पंचवर्तिसमायुक्तंसर्वामंग
लनाशनं॥नारीनीराजनंभक्त्याभवद्भिस्तन्निरीक्ष्यतां॥नीराजनं॥
सप्तऋषयःशुभाश्रेष्ठाःसर्वेषांचशुभप्रदा॥सर्वपापंव्यपोहंतुज्ञ
नतोज्ञाननतत्कृतं॥सप्तऋषिदे०पुष्पांजलिं॥न्यूनातिरिक्तानिपरि
स्फुटानियानीहकर्माणिमयाकृतानि॥क्षम्याणिचैतानिममक्षमस
क्षमस्वप्रयातुतुष्टापुनरागमाय॥अरुंधतीदेवतासप्तऋषिदेव०द
क्षिणा॥स्वर्लोकाद्रारूतंविप्राच्चतुराननवर्चसः॥ममतत्संपतांसर्वे

ऋ०प०पं० ॥६॥

व्रतसंपूर्णतदस्तुमे॥नमस्कारः॥कश्यपोत्रिभरद्वाजोविश्वामित्रो
थगोतमः॥जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती॥ऋषिमंत्र॥
दायनं॥नानाविधानिशाखानिकंदमूलफलप्रद॥ऋषीणांप्रीणना
र्थायब्राह्मणायददाम्यहं॥प्रार्थना॥ज्ञानतोज्ञानतोवापियत्किंचेदु
ष्कृतंकृतं॥तत्सर्वंनाशमायातुशरणांगतवत्सलः॥मंत्रहीनंक्रिया
हीनं॥इतिऋषिपंचमीव्रतपूजासमाप्तः॥शुभमस्तु॥श्रीरस्तु॥
भाद्रपदेमासेकृष्णपक्षे४भृगुवासर॥संवत१८६१मुकामझांशी

राम
॥६॥